योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२४

चतुर्विंशः सर्गः २४

श्रीवसिष्ठ उवाच ।

ममेत्युक्तवतो मङ्किर्विनिपत्य स पादयोः ।

उवाचानन्दपूर्णाक्षमिदं मार्गे वहन्वचः ।। १

मङ्किरुवाच ।

भगवन्भूरिशो भ्रान्ता दिशो दश दृशो यथा ।

मया न तु पुनः साधुर्लब्धः संशयनाशकृत् ।। २

समस्तदेहसाराणां सारस्याद्य फलं मया ।

खिन्नोस्मि भगवन्पश्यन्दशाः संसारदोषदाः ।। ३

पुनर्जातं पुनर्नष्टं सुखदुःखभ्रमः सदा ।

अवश्यंभाविपर्यन्तदुःखत्वात्सकलान्यपि ।। ४

सुखान्येवातिदुःखानि वरं दुःखान्यतो मुने ।

दृढदुःखवदन्तत्वाद्दुःखयन्ति सुखानि माम् ।। ५

तथा राम यथा दुःखमेव मे सुखतां गतम् ।

वयोदशनलोमान्त्रैः सह जर्जरतां गतम् ।। ६

उच्चैःपदे पातपरा बुद्धिर्नाध्यवसायिनी ।

सुप्रवालं कुसंकल्पाद्गहनं न प्रकाशते ।। ७

मनः पिप्पलपल्यूलैरिव कुग्रामकोटरम् ।

वासनाङ्गवहैर्गृध्रैर्नित्यं पापीयसी स्थितिः ।। ८

कण्टकद्रुमवल्लीव करालकुटिला मतिः ।

आयुरायासशालिन्या यामिन्येव तमोन्धया ।। ९

अक्षीवानागतालोकं क्षीणं संततचिन्तया ।

न किंचिद्रसमादत्ते नष्टैवापि न नश्यति ।। १०

न पुष्पिता न फलिता तृष्णा शुष्कलतेव नः ।

कर्म कर्मणि निर्मग्नं वासनाख्यमकर्मणे ।। १०

जीवितं च जने जीर्णं नैवोत्तीर्णो भवार्णवः ।

दिनानुदिनमुच्छूना भोगाशा भयदायिनी ।। १२

पूर्णापूर्णात्मनि क्षीणाः श्वभ्रकण्टकवृक्षवत् ।

चिन्ताज्वरविकारिण्यो लक्ष्म्याः खलु महापदः ।। १३

संपन्नमक्षतं सापि विप्रलम्भेन जृम्भते ।

अन्तः स्फुरितरत्नेहं भास्वरं वान्धकोटरम् ।। १४

कल्लोलकलिलं शून्यं चेतः शुष्काब्धिदुर्भगम् ।

मामिन्द्रियार्थैकपरं न स्पृशन्ति विवेकिनः ।। १५

सकण्टकममेध्यस्थं श्लेष्मातकमिव द्रुमम् ।

असदेव महारम्भं चलदर्जुनवातवत् ।। १६

मनो मरणमप्राप्तं शून्यं दुःखाय वल्गति ।

शास्त्रसज्जनसंपर्कचन्द्रतारकधारिणी ।। १७

अहंभावोल्लसद्यक्षा क्षीणा नाज्ञानयामिनी ।

अज्ञानध्वान्तमत्तेभसिंहः कर्मतृणानलः ।। १८

उदितो न विकारार्को वासनारजनीक्षयः ।

अवस्तु वस्तुवद्बुद्धं मत्तश्चित्तमतंगजः ।। १९

इन्द्रियाणि निकृन्तन्ति न जाने किं भविष्यति ।

शास्त्रदृष्टिरपि प्राज्ञैर्नाश्रिता तरणाय या ।। २०

साप्यदृष्टिरिवान्ध्याय वासनावेशकारिणी ।

तदेवमतिसंमोहे यत्कार्यमिह दारुणे ।

उदर्कश्रेयसे तात तन्मे कथय पृच्छते ।। २१

शाम्यन्ति मोहमिहिकाः शरदीव साधौ

प्राप्ते भवन्ति विमलाश्च तथाखिलाशाः ।

सत्येति वाग्भवतु साधुजनोपगीता

मद्बोधनेन भवता भवशान्तिदेन ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे मङ्क्यु० मङ्किवैराग्यं नाम चतुर्विंशः सर्गः ।। २४ ।।